- Title – तैत्तिरीयोपनिषद् (भृगुवल्ली)
- Accession No – Title –
- Accession No –
- Folio No/ Pages – ५/8
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – ओइम् श्री गुरुभ्योनमः
- End – ओइम् शान्ति । शान्ति । शान्ति
- Colophon-
- Illustrations -
- Source -
- Subject - उपनिषद्
- Revisor -
- Author -
- Remarks- पूर्ण

Neby

३. ॐश्रीगुरुभ्योनमः ॐसहनाववतुसहनौभुनक्तुसहवीर्यंकरवावहैतेजस्विनावधी
१ तमस्तुमाविद्विषावहै ॐशांतिः शांतिः शांतिः हरिः ॐभृगुर्वैवारुणिः वरुणंपि
तरमुपससारअधीहिभगवोब्रह्मेतितस्माएतत्प्रोवाच अन्नंप्राणंचक्षुःश्रोत्रंम
नोवाचमितितंहोवाचयतोवाइमानिभूतानिजायन्तेयेनजातानिजीवन्तियत्प्र
यंत्यभिसंविशंति तद्विजिज्ञासस्वतद्ब्रह्मेतिसतपोतप्यतसतपस्तप्त्वा १ अन्नंब्र
ह्मेतिव्यजानात्अन्नाद्ध्येवखल्विमानिभूतानिजायंते अन्नेनजातानिजीवंतिअन्नंप्र
यंत्यभिसंविशंतीतितद्विज्ञायपुनरेववरुणंपितरमुपससार अधीहिभगवोब्रह्मे
तितंहोवाचतपसाब्रह्मविजिज्ञासस्वतपोब्रह्मेतिसतपोतप्यतसतपस्तप्त्वा २
प्राणोब्रह्मेतिव्यजानात्प्राणाद्ध्येवखल्विमानिभूतानिजायन्तेप्राणेनजातानि १

जीवन्तिप्राणंप्रयन्त्यभिसंविशंतीतितद्विज्ञायपुनरेववरुणंपितरमुपससार अधी
हिभगवोब्रह्मेतितंहोवाच तपसाब्रह्मविजिज्ञासस्वतपोब्रह्मेतिसतपोतप्यतस
तपस्तप्त्वा ३ मनोब्रह्मेतिव्यजानात् मनसोह्येवखल्विमानिभूतानिजायन्तेमन
साजातानिजीवन्तिमनःप्रयंत्यभिसंविशंतीतितद्विज्ञायपुनरेववरुणंपितरमु
पससारअधीहिभगवोब्रह्मेतितंहोवाचतपसाब्रह्मविजिज्ञासस्वतपोब्रह्मेति
सतपोतप्यतसतपस्तप्त्वा ४ विज्ञानंब्रह्मेतिव्यजानात्विज्ञानाद्ध्येवखल्विमानिभू
तानिजायंतेविज्ञानेनजातानिजीवंतिविज्ञानंप्रयंत्यभिसंविशंतीतितद्विज्ञायपु
नरेववरुणंपितरमुपससारअधीहिभगवोब्रह्मेतितंहोवाचतपसाब्रह्मविजिज्ञा
सस्वतपोब्रह्मेतिसतपोतप्यतसतपस्तप्त्वा ५ आनन्दोब्रह्मेतिव्यजानात् आनन्दा

३ द्ध्येवखल्विमानिभूतानिजायन्तेआनन्देनजातानिजीवन्तिआनन्दंप्रयन्त्यभिसं
२ विशंतीतिसैषाभार्गवीवारुणीविद्यापरमेव्योमन्प्रतिष्ठितायएवंवेदप्रतितिष्ठति
अन्नवानन्नादोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या ६ अ
न्नंनिनत्द्व्रतंप्राणोवाअन्नंशरीरमन्नादंप्राणेशरीरंप्रतिष्ठितंशरीरेप्राणःप्रति ५
ष्ठिताः तदेतदन्नमन्नेप्रतिष्ठितंसयएतदन्नेप्रतिष्ठितंवेदप्रतितिष्ठत्यन्नवानन्ना
दोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या ७ अन्नंनपरिच
क्षीततद्व्रतंआपोवाअन्नंज्योतिरन्नादंअप्सुज्योतिःप्रतिष्ठितंज्योतिष्यापःप्रतिष्ठिताः
तदेतदन्नमन्नेप्रतिष्ठितंसयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठत्यन्नवानन्ना
दोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या ८ अन्नंबहुकु २

उ. यस्यसर्वमित्याकाशेतत्प्रतिष्ठेत्युपासीतप्रतिष्ठावान्भवतितन्महइत्युपासीतमहा
न्भवतितन्मनइत्युपासीतमानवान्भवतितन्नमइत्युपासीतनम्यन्तेस्मैकामाःतद्ब्रह्मे
३ त्युपासीतब्रह्मवान्भवतितद्ब्रह्मणःपरिमरइत्युपासीतपर्येणंम्रियन्तेद्विषन्तःसप
त्नाःपरियेप्रियाभ्रातृव्याःसयश्चायंपुरुषेयश्चासावादित्येसएकःसयएवंवित्‌अ 5
स्माल्लोकात्प्रेत्यएतमन्नमयमात्मानमुपसंक्रम्य एतंप्राणमयमात्मानमुपसंक्र
म्यएतंमनोमयमात्मानमुपसंक्रम्यएतंविज्ञानमयमात्मानमुपसंक्रम्यएतमानंद
मयमात्मानमुपसंक्रम्यइमाल्लोकान्कामान्नीकामरूप्यनुसंचरन् एतत्सामगायन्ना
स्तेहा३उहा३उहा३उअहमन्नमहमन्नमहमन्नमहमन्नादो३हमन्नादो३हमन्नादः अ
हं३श्लोककृदहं३श्लोककृदहं३श्लोककृत् अहमस्मिप्रथमजाऋतस्यपूर्वंदे ३

वीततद्व्रतंपृथिवीवाअन्नंआकाशोन्नादःपृथिव्यामाकाशःप्रतिष्ठितःआकाशे
पृथिवीप्रतिष्ठितातदेतदन्नमन्नेप्रतिष्ठितंसयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठ
तिअन्नवानन्नादोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या ९
नकंचनवसतौप्रत्याचक्षीततद्व्रतंतस्माद्ययाचविधयाबह्वन्नंप्राप्नुयात् अराध्य
स्माअन्नमित्याचक्षतेएतद्वैमुखतोन्नꣳराद्धंमुखतोस्माअन्नꣳराध्यतेएतद्वैमध्यतो
न्नꣳराद्धंमध्यतोस्माअन्नꣳराध्यतेएतद्वाअन्ततोन्नꣳराद्धमन्ततोस्माअन्नꣳराध्य
तेयएवंवेदक्षेमइतिवाचियोगक्षेमइतिप्राणापानयोः कर्मेतिहस्तयोर्गतिरि
तिपादयोःविमुक्तिरितिपायौइतिमानुषीःसमाज्ञाःअथदैवीःतृप्तिरितिवृष्टौ
बलमितिविद्युतियशइतिपशुषुज्योतिरितिनक्षत्रेषुप्रजातिरमृतमानंदइत्यु

वेभ्योअमृतस्यनाभिःयोमाददातिसइदेवमावदह मन्नमदंतमद्मिअहंविश्वंभुव 7
नमभ्यभवांसुवर्णज्योतिःयएवंवेद इत्युपनिषत् १ सहनाववतुसहनौ
भुनक्तुसहवीर्यंकरवावहैतेजस्विनावधीतमस्तुमाविद्विषावहै ॐशांतिः
शांतिः शांतिः ॥

8